अखिलकर्णाटकसंस्कृतपरिषदः

## पञ्चमं संमेलनम्

( आदिचुञ्चनगिरिक्षेत्रे )

८, ९, १० अक्टोबर १९८४

# अध्यक्षभाषणम्

विद्वान् एन्. रङ्गनाथशर्मा

अखिलकर्णाटकसंस्कृतपरिषदा प्रकाशितम्

श्रीः

# अखिलकर्णाटकसंस्कृतपरिषदः

# पञ्चमं संमेलनम्, १९८४

(आदिचुञ्चनगिरिक्षेत्रे)

# अध्यक्षभाषणम्

कवीन्द्राणां चेतःस्फुरणमुपकल्प्याप्रतिहतं
हतं लोकं जाड्यादमृतरससेकेन निभृतम् ।
समुज्जीव्य श्रेयः सुभगचतुरस्रं विदधती
जयत्येका वाणी निखिलभुवनानन्दजननी ॥

संमान्या राज्यपालाः श्री ए. एन्. व्यानर्जिमहोदयाः, आदिचुञ्चनगिरि क्षेत्रीयमठस्य पीठाध्यक्षाः श्रीबालगङ्गाधरनाथस्वामिनः, अखिलकर्णाटक संस्कृतपरिषदोऽध्यक्षाः पदाधिकारिणश्च, उपस्थिता विद्वांसः सज्जनाः, महिलाः, सुहृदश्च !

अखिलकर्णाटकसंस्कृतपरिषदा समायोजित पञ्चमं कर्णाटकसंस्कृत-संमेलनमिदं प्रकृतिमनोहरे पवित्रेऽस्मिन् आदिचुञ्चनगिरिक्षेत्रे प्रवृत्तमिति महान्तं प्रमोदं जनयति सर्वेषां संस्कृतप्रणयिनाम् । अस्य महासंमेलनस्य अध्यक्षत्वेन यदहं वृतोऽस्मि, तत्र तु अस्याः संस्कृतपरिषदोऽध्यक्षाणां कार्य-कर्तॄणां भवताञ्च सौहार्दसंमिलितमौदार्यं विना नान्यत् कारणमुपलक्षये । सत्सु च मत्तोऽपि ज्ञानवृद्धेषु वयोवृद्धेषु विद्वदग्रणीषु प्राज्ञेषु सेय विश्वासपूर्णा

महती संभवना मयि प्रदर्शिता । तदर्थमेभ्यः सर्वेभ्यो भवद्भ्यश्च भवन्ति मदीयाः कृतज्ञतापूर्णाः प्रणामाः समर्पिताः ।

'ओङ्कार एव सर्वा वाक्, सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' इति श्रुतिः, 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा' इति स्मृतिः, 'सिद्धे शब्दार्थसंबन्धे, सिद्धन्तु नित्यशब्दत्वात्' इति कात्यायनवार्तिकम्, 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्' इति वाक्यपदीयवचनञ्च संस्कृतभाषामधिकृत्य प्रवृत्तानीति स्फुटं तद्विदाम्। सेयं संस्कृतभाषा सर्वव्यापिनी सर्वविज्ञानप्रसूरवगम्यते, यदाह तत्रभवान् भाष्यकारः—'महान् शब्दस्य प्रयोगविषयः, सप्तद्वीपा वसुमती त्रयो लोकाः चत्वारो वेदाः साङ्गाः सरहस्याः' इत्यादि। इदानीं समुपलभ्यमानमेव ग्रन्थजातं वैपुल्येन सारवत्तया च सर्वमन्यभाषामयं साहित्यमतिशेत इति चित्रीयते चेतः । प्राचीनैर्विरचितेषु ग्रन्थेषु 'कति नष्टाः कति दग्धाः कति शिष्टाः' इत्यपि न जानीमः । आह च कल्हणो राजतरङ्गिण्याम्—

> सिकन्दरधरानाथो यवनैः प्रेरितः पुरा ।
> पुस्तकानि च सर्वाणि तृणान्यग्निरिवादहत् ॥ इति ।

अपि चाष्टाध्याय्यामुणादिसूत्रेषु च व्युत्पाद्यमाना बहवः शब्दा इदानीमुपलभ्यमानेषु ग्रन्थेषु नावलोक्यन्ते। प्रयुक्तानामेव शब्दानां किल भवति व्याकरणेन अन्वाख्यानम् । सन्ति च शब्दा अप्रयुक्ताश्चेति विप्रतिषिद्धम् । तस्मादिदानीं ग्रन्थेष्वनुपलभ्यमानो व्युत्पाद्यमानश्चायं शब्दसंदोह एवानुमापयति विनष्टं ग्रन्थराशिं धूम इव वह्निम् ।

## संस्कृतभाषाया व्याप्तिः

ऋषिभिर्दार्शनिकैर्वैद्यकादिशास्त्रकारैः कविभिश्च प्रकाममुपलालितेयं भाषा कदाचिद् व्यावहारिकी बभूवेत्यत्र नास्ति संशीतिः । नहि लोके

तादृशी काचिदस्ति कृत्रिमा भाषा या व्यवहारपथमतिक्रान्ता, पण्डितैर्जनोपयोगिग्रन्थेषूपयुज्येत। 'भाषणाद् भाषा' इति निर्वचनमपि सामान्यजनैर्भाष्यमाणत्वमस्या व्यनक्ति। आचार्यः पाणिनिरष्टाध्याय्यां संस्कृतं भाषेत्येव व्यवहरति। पाणिनेः पूर्वमस्मिन् भारतदेशे संस्कृतमेव जनैरुपयुज्यते स्मेत्यत्र शक्यं प्रमाणं दर्शयितुम्। अपि च तिष्ठद्गु, वहद्गु, गोगोष्ठम्, शम्बाकरोति, उष्ट्रगोयुगम्—इत्यादयः शब्दाः कृषीवलेषु, पशुपालकेषु, वाणिज्यजीविषु, आयुधोपजीविषु द्यूतकारादिषु च प्रसिद्धाः शास्त्रग्रन्थविषया एव न भवन्ति। पात्रेसमितः, गेहेनर्दी, ग्रामषण्डः, नगरकाकः, अश्नीतपिबता इत्यादयः शब्दाः पाणिनीये व्युत्पादिता दैनन्दिनिकव्यवहारगोचरा एव। 'न हि शब्दाः क्रियन्ते, प्रयुक्तानामिदमन्वाख्यानम्' इति महाभाष्यकारस्य स्फुटोक्तिः, ग्रामवाचकानां निरुक्तिः, 'प्राच्येषु, उदीच्येषु कम्बोजेषु' इत्यादिना देशभेदात् शब्दस्वरूपस्य अर्थस्य च भेदप्रदर्शनं संस्कृतभाषायाः स्वाभाविकत्वं व्यवहारगोचरत्वञ्च स्फुटयतीत्यलं विस्तरेण।

इयं हि चिरान्निखिलमुनिजनमनीषितं प्रतिबिम्बयन्ती, बादरायण जैमिनिकपिलगौतमप्रमुखदार्शनिकतपोविभूतिमाविर्भावयन्ती, व्यासवाल्मीकिभासकालिदासजिनसेनप्रभृतिकविकोकिलकदम्बकान् कूजयन्ती, जैनबौद्धपाशुपतवीरशैवादिशास्त्रनिष्णातान् प्रेरयन्ती, वैद्यकज्यौतिषगज शास्त्राश्वशास्त्रादिप्रवीणान् चरकार्यभटादिमेधाविनश्चोदयन्ती, आसेतुहिमाचलपर्यन्तं भारतीयानां नवनवां प्रतिभामुन्मेषयन्ती, धर्मं धारयन्ती, कर्मणो मर्म बोधयन्ती, कर्णाटकादिदेशभाषासमुदयमाप्याययन्ती, भरतखण्डस्याखण्डतां समानरूपेण शिष्टाचारेण चिन्तनप्रकारेण च वज्रलेपेनेव घटयन्ती विराजते सनातनी सुरसरस्वती। अनया च भाषया पुराण्या सदा नव्ययेव विभाव्यमानया कति जना उद्धृताः कति च संपोषिताः कति च संतोषिताः कति सुखं प्रापिताः कति पथि स्थापिता इति गणयितुं न शक्यते पुरुषायुषेणापि।

सेयं संस्कृतभाषा कन्नडमहाराष्ट्रादिनिखिलदेशभाषासु देशीयकाव्यशास्त्रेषु आचारविचारेषु च समस्तं भरतखण्डं विविधरूपेण व्याप्नुवाना, भारतीयसंस्कृतिस्रोतोवहा मणिगणानिवाखिलभारतीयान् धारयन्ती सूत्रायमाणा भगवन्नारायणमूर्तिरिव प्रकटितविश्वरूपा चिराय राराजते।

## संस्कृतभाषादेशभाषयोरविरोधः

कन्नडप्रभृतयो देशभाषाः संस्कृतेन पुष्टा इति तु निर्विवादम्। भूयसः शब्दान् अलङ्कारव्याकरणवेदान्तादिशास्त्रीयविषयांश्च प्रदाय देशीयभाषावाङ्मयं भृशं पोषितवतीति सूर्यप्रकाशवत् स्पष्टं प्रतीयते मनीषिणाम्। पम्पषडक्षरदेवप्रभृतयः कवयः कन्नडकुलतिलकायमानाः संस्कृतसाहित्ये परां प्रौढिमासेदुः। नागवर्मा भट्टाकलङ्कश्च कन्नडव्याकरणशास्त्रं संस्कृतभाषया विरचयामासतुः। इत्थं कर्णाटकराज्ये संस्कृतकन्नडभाषयोरन्योन्यमैत्री अविच्छिन्ना चिराय जागर्ति। सत्यप्येवं क्षीरे क्षारमिव पश्यन्तः केचित् संस्कृतं विरुन्धन्तः इमां भाषां प्रौढशालाभ्य उच्चाटयितुकामाः महता कोलाहलेन व्यजृम्भन्तेति नाविदितं भवताम्। उत्तरप्रत्युत्तररूपेण विषयेऽस्मिन् बहु पराक्रान्तं सूक्ष्मवेदिभिः। अनल्पं लिखितं भाषितञ्च। विवादोऽयमुच्चन्यायालयं परमोच्चन्यायालयञ्च प्रापदिति संस्कृतविरोधिनां छलग्रन्थिर्विस्मापयते समस्तान्। अन्ते च अग्नावाध्मापिता सुवर्णशलाकेव संस्कृतवाणी नितरामशोभतेति सुतरां शोभनम्।

अस्याञ्च जयप्राप्तौ केचन महाभागाः संस्कृतानुरागिणः दैहिकेन मानसेन चायासेन बहुधनव्ययेन च शश्रमुः। तेभ्यः सर्वेभ्योऽपि महाभागेभ्यः, अहमिदानीं संस्कृतप्रणयिनां प्रतिनिधीभूय कृतज्ञतापूर्वकान् सादरान् प्रणामान् समर्पयामि।

वयं तावत् कर्णाटके जनपदे संभूताः संवर्धिताश्च। कन्नडभाषा भवत्यस्माकं मातृभाषा। तयैव वयं मातुरुत्सङ्गे लालिता वर्धिताः शिक्षिताश्च।

न कदाचिद्वयं मातृभूतायाः कन्नडभाषाया विरोधं मनसापि चिन्तयामः। कन्नडभाषा सर्वात्मना पुष्टिं प्राप्नुयात् पालयताच्चास्मानित्यस्मदीया निश्चिता मतिः । सोमेश्वरो नाम कार्णाटः संस्कृतकविः ब्रह्मसृष्टौ कर्णाटदेशः सारभूत इति साभिमानं वर्णयति विक्रमाङ्काभ्युदये—

देशानन्यान् पूर्वमभ्यासहेतोः
कृत्वा मन्ये लब्धशिल्पप्रकर्षः ।
पश्चाच्चक्रे यं विधिः सृष्टिसारं
स व्यावर्ण्यः कैर्न कर्णाटदेशः ॥ इति

संस्कृतभाषाध्ययनेनैव कन्नडभाषायाः पुष्टिस्तुष्टिश्च, नो चेन्महती विनष्टिरिति तु दृढं मन्यामहे । तस्मात्—

मातृवद् भगिनीवच्च या नः पुष्णाति मातरम् ।
गैर्वाण्यपि च सा जीयादित्येवास्माकमाशयः ॥

## कर्णाटके संस्कृतम्

कर्णाटकदेशे प्राचीनकालादारभ्य विद्वद्वराः कविवराश्च सुरसरस्वतीं साधु संसेव्य कृतकृत्या बभूवुः । क्रिस्तीयपञ्चमशतके कदम्बराजस्य शान्तिवर्मण आस्थानं कुब्जो नाम कवीश्वरो भूषयामासेति तालगुन्दशिलालेखादवसीयते । कन्नडदेशीयेषु पण्डितेषु कविषु च बहवो जैनमतीया इति तु मननीयो विशेषः । तत्र हेमसेनेन राघवपाण्डवीयं नाम दुष्करं श्लेषकाव्यं विरचितम् । वादीभसिंहेन गद्यचूडामणिः, क्षत्रचूडामणिश्चेति गद्यकाव्यद्वय निर्मितम् । तथा सोमदेवसूरेः यशस्तिलकचम्पूः, जिनसेनाचार्यस्य रसनिर्भरं महापुराणम्, वादिराजस्य यशोधरचरितम्, पार्श्वनाथचरितञ्च प्रामुख्यतो गणनीयानि जैनकाव्यानि । एवं कुन्दकुन्दाचार्यः, उमास्वामी, पूज्यपादः, अमृतचन्द्रसूरिः, भट्टाकलङ्कः इत्यादयो विद्वत्तल्लजाः जैनाः कार्णाटाश्च बहून् तर्ककर्कशान् जैनसिद्धान्ते प्रौढग्रन्थान् विरचयामासुः ।

अपि च याज्ञवल्क्यस्मृतेः सुप्रसिद्धव्याख्याता विज्ञानेश्वरः कन्नडदेशीयः । सोमदेवस्य अभिलषितार्थचिन्तामणिर्नाम विश्वकोशः, केळदी बसवराजेन्द्रस्य शिवतत्त्वरत्नाकरः, विद्याचक्रवर्तिनो रुक्मिणीकल्याणम्, त्रिविक्रमपण्डितस्य उषाहरणम्, गङ्गादेव्याः वीरकम्पणरायचरितम्, तिरुमलाम्बाया वरदाम्बिकापरिणयः, अनन्तभट्टस्य भारतचम्पूः—इत्यादयो विपुलाः सन्ति कृतयो, याः किल कर्णाटकदेशीयैः संस्कृतसरस्वत्याः उपहारीकृताः ।

श्रीमन्मध्वाचार्यास्तदनुयायिनश्च बहवः कर्णाटकदेशीयाः, यैः किल द्वैतवेदान्तस्थापकाः विपुलाः प्रौढाश्च ग्रन्था विरचिताः ।

विजयनगरसाम्राज्ये च श्रीविद्यारण्य - सायणाचार्य - भोगनाथादीनां विद्वद्दिग्गजानां वेदभाष्यादिनिर्मातॄणां समुदाय एवासीत् । वीरशैवेषु खल्वपि पाल्कुरिकेसोमनाथषडक्षरदेवादयः पण्डिताः कवयश्च कर्णाटकदेशं भूषयामासुः ।

अधुनातनेष्वपि श्रीविरूपाक्षशास्त्रिणः, लक्ष्मीपुरं श्रीनिवासाचार्याः, पण्डित रामचन्द्राचार्याः, श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनश्च पण्डितप्रकाण्डा अस्माभिः प्रत्यक्षीकृताः । महाकविषु खल्वपि जग्गू शिङ्गय्यङ्गार्याः, आल्वारय्यङ्गार्याः, पण्ढरीनाथाचार्याः अन्ये च सन्तीति अविच्छिन्नां विद्वत्परंपरां साभिमानं निवेदयामि ।

## कर्णाटकदेशे संस्कृताध्ययनस्य परिस्थितिः

एकीकरणात् पूर्वं मैसूरुदेशे महाराजकृपापोषिता संस्कृतभारती सुचिरं शोभते स्म । एकीकरणादनन्तरमपि उदारहृदयेन सर्वकारेण नूतनाः संस्कृतमहापाठशालाः पाठशालाश्च अनुदानप्रदानेन संस्थापिताः । यथाशक्ति यथार्हञ्च कर्णाटकसर्वकारेण प्रोत्साह्यते संस्कृताध्ययनमिति प्रमोदास्पदम् । कासुचित् प्रौढशालासु विश्वविद्यालयेषु च विद्यते संस्कृताध्ययनस्यावकाशः ।

तथा शृङ्गेरीजगद्गुरुभिः स्वतन्त्रतया संस्थापिता महापाठशाला, पाठशाला, सुरसरस्वतीसभा चात्र स्मर्तव्यतां भजन्ते ।

सर्वकारेण चाल्यमानासु अष्टसु महापाठशालासु शतत्रयादप्यधिकासु पाठशालासु च सांप्रदायिकमध्ययनं प्राचीनरीत्या प्रवर्तते । महापाठशालासु व्याकरणम्. नवीनन्यायः, सर्वे वेदान्तभेदाः, पूर्वमीमांसा, ज्यौतिषम्, धर्मशास्त्रम्, अलङ्कारः, जैनसिद्धान्तश्चेत्येतेषु शास्त्रेषु वेदेष्वागमेषु च प्रौढपाण्डित्यसम्पादनाय कल्पितोऽवकाशः ।

## प्रौढपाण्डित्यम्

अत्र परमोच्चा विद्वदुत्तमपरीक्षाः प्रवर्तन्ते, यासु छात्राणां गभीरं पाण्डित्यमपेक्षितं शास्त्रेषु इत्यस्ति नियमः । परमिदानीं तादृशं प्रौढं पाण्डित्यं विरलप्रायमासीदिति खेदास्पदम् ।

स्वाध्यायप्रवचनाभ्यां शास्त्रसंरक्षणं भवति । तच्च न सिध्यति पल्लव-ग्राहिपाण्डित्येन । शास्त्ररक्षार्थं परं प्रौढपाण्डित्यप्रोत्साहनार्थं च विदुषां वाक्यार्थसभा प्रचाल्यते कैश्चिन्मठाधिपतिभिरिति सांप्रतम् । अयमेकः प्रकारः शास्त्ररक्षायाः । अहं तु मन्ये सर्वैरपि मठाधिपतिभिरेषा प्रतिज्ञा कर्तव्या यदेकैकस्मिन्नपि मठे अन्यतमस्य शास्त्रस्य सर्वात्मना पोषणं संरक्षणञ्च विधीयत इति ।

यदीदं गभीरं तलस्पर्शि च पाण्डित्यं न संरक्ष्येत, तर्हि महती विनष्टिः । पूर्वजैर्यत्नेन सम्पादितो निधिरपहस्तितो भवेत् । शास्त्रेषु कृतस्तेषां महान् श्रमो व्यर्थतामियात् । विद्वत्परीक्षामुत्तीर्णा जना केनापि वेतनप्रदायिना नियोगेन तृप्तिमावहन्ति, विरम्यते च तेषामध्ययनवार्तया । जीविकानिर्वहणस्य व्यवस्थितौ, किमर्थं पुनरौदासीन्यमध्ययनेष्विति चिन्तास्पदम् । यया विद्यया वय जीविकां निर्वहामः तस्यां विद्यायां परिनिष्ठितज्ञानसम्पादनं, ग्रन्थनिर्माणं,

प्रवचनं, प्रचार इत्यादि कार्यजातमस्माकं प्रथमः कल्पः। सर्वथा वयमधमर्णाः स्मः संस्कृतसरस्वत्याः।

## आधुनिकसंस्कृतवाङ्मयम्

'इमे खलु संस्कृतज्ञाः प्राचीनस्य संस्कृतवाङ्मयस्य वैभवं प्रदर्शयन्तस्तुष्यन्ति, न तु नूतनं वाङ्मयं सृजन्ती'—इति तु मिथ्यालापः। अस्मिन्नेव क्रिस्तीये विंशे शतके महाकाव्यानि, खण्डकाव्यानि, नाटकानि, चम्पूकाव्यानि च सहस्रशः संस्कृतकविवरैः प्रणीय प्रकाशितानि। व्याकरणवेदान्तादिशास्त्रेष्वपि वैदुष्यपूर्णानि प्राचीनपण्डितानां ग्रन्थैः समकक्षतां प्राप्तानि व्याख्यानानि विद्वद्वरैर्निर्मितानि।

नवनिर्मितानां ग्रन्थानां परिचयार्थमिमे निबन्धा विलोक्यन्तां यदि कुतूहलम्—

१. अर्वाचीनसंस्कृतसाहित्यम् (प्रा. श्रीवर्णेकरमहोदयैः निबद्धम्)

२. विद्वद्वृत्तम् (पं. श्रीकालीप्रसादशास्त्रिभिर्निबद्धम्)

३. नवदिल्ली साहित्यप्रतिष्ठानतः प्रकाश्यमानायाः 'संस्कृतप्रतिभा'याः निकषोपलनामा समालोचनस्तम्भः)

४. Modern Sanskrit Writings (By Dr. V. Raghavan)

तत्र आधुनिकमहापुरुषान् इतिहासप्रसिद्धशिवाजीप्रभृतींश्चाधिकृत्य महाकाव्यानि प्रणीतानीति विशेषः। इमे ग्रन्था विशेषतः स्मरणीयाः—

१. मदनमोहनमालवीयमहाभागमधिकृत्य कृतं मालवीयमहाकाव्यम्।

२. गान्धिमहात्मानमधिकृत्य रचितं गान्धिचरितम्।

३. डा. वर्णेकरविरचितं विवेकानन्दविजयम्।

४. तैरेव प्रणीतं श्रीशिवराज्योदयम्।

५. अणेमहाशयनिर्मितः श्रीतिलकयशोऽर्णवः।

६. जवाहरलालमहाभागमुद्दिश्य प्रणीतं विशालभारतम् ।

७. रमेशचन्द्रशुक्लप्रणीतो बङ्गलादेशः ।

८. दिनेशप्रसादपाण्डेयरचितं भारतायनम् — इत्यादि ।

कर्णाटकदेशेऽपि श्रीपण्ढरीनाथाचार्यादिभिः प्रणीतानि सन्ति बहूनि काव्यानि नाटकानि च । डा. के. कृष्णमूर्तिमहाभागैः बहवः काव्यालङ्कार-ग्रन्थाः कन्नडभाषायामनूदिताः। कुन्तकस्य वक्रोक्तिजीवितं भूयसा परिश्रमेण सम्पाद्य अङ्ग्लभाषया परिवर्तितञ्चेति विशेषतः स्मरणीयम् ।

तथा पत्रिकाक्षेत्रेऽपि प्रशंसार्हं कार्यमनुष्ठितं संस्कृतज्ञैः । दैनिकी, साप्ताहिकी, पाक्षिकी, त्रैमासिकी, षाण्मासिकी, अनियतकालभवा चेति शतशः प्रकाश्यन्ते पत्रिकाः । कर्णाटके च श्रीवरदराज अय्यङ्गार्यमहोदयैः, मैसूरुनगरात् प्रकाश्यमाना सुधर्मा नाम दिनपत्रिका विशेषतः समुल्लेख-मर्हति ।

## भाषायाः सरलीकरणम्

आकाशवाणी तावद् द्विवारं संस्कृतभाषया प्रत्यह वार्ताः प्रसारयति । सोऽयं कार्यक्रमः संस्कृताभिमानिनां प्रियो जातः । लौकिकराजकीय-विषयानपि बोधयितुं समर्थेयं भाषेत्येतेन प्रमाणीकृतम् । तथापि जागर्त्यय-मुद्घोषः क्वचित् 'संस्कृतभाषा कष्टा, व्याकरणं कष्टम् । तस्मादेषा सरली-करणीये'ति । अत्रैवं प्रतिभाति — जगति विद्यमाना सर्वापि भाषा कठिनैवादौ भासते । सर्वत्र व्याकरणाध्ययनमेव परिशुद्धवाक्यप्रयोगे हेतुः । सर्वास्वपि भाषासु व्याकरणं कष्टमेव । विना श्रमं न कश्चिदभ्युदयो लोके दृष्टः । किञ्च संस्कृताध्यापनक्रमे पठ्यपुस्तकनिर्माणे च सन्ति बहवो दोषाः । तानहमिदानीं साकल्येन परिशीलयितुं नेच्छामि । इदन्तु वक्तव्यम् । संस्कृतस्य प्राथमिक-शिक्षणमारभ्य प्रौढशिक्षणपर्यन्तं कन्नडभाषया आंग्लभाषया वा अध्यापयन्ति शिक्षकाः । अयमेको महान् हेतुः संस्कृतं कष्टमित्युद्घोषे । विषयेऽस्मिन्

गभीरं चिन्तयितव्यमस्माभिः । न हि कोऽप्यांग्लभाषां शिक्षयितुकामो भाषान्तरं माध्यमत्वेनाश्रयति । यदि प्राथमिकशिक्षणे छात्राणां हितदृष्ट्या कन्नडभाषाया आश्रयणं क्वचिदावश्यकं तत्र तथैव भवतु नाम, परन्तु तत्र भूयोव्यवहारः संस्कृतेनैव भवितुमर्हति । तथा सति बहून् संस्कृतशब्दान् व्यवहारेणैव सुलभतया गृह्णन्ति छात्राः । व्यवहारो हि शक्तिग्राहक-शिरोमणिः । विना व्यवहारसम्बन्धं भाषाध्ययन नैव सौलभ्याय कल्पते । महापाठशालासु विश्वविद्यालयेषु च भाषान्तरं माध्यमत्वेनोपयुज्यते, न तु संस्कृतमिति कोऽय प्रकारः? अध्यापकानामसामर्थ्यं प्रायशस्तत्र हेतुः । इदमसामर्थ्यं तदध्यापकेभ्यस्तेषु संक्रान्तमिति परम्परितेयं शृङ्खला । यदि चास्याः शृङ्खलायाः न मुच्यामहे तर्हि परित्यज्यतां संस्कृतस्य सरलीकरणे प्रचारे च प्रत्याशा ।

संस्कृतभाषायां भवन्ति साधारणशब्दा विशेषशब्दाश्चेति । तत्र विशेष-शब्देषु नामपदानां क्रियापदानाञ्च उपयोगस्तावत्, विना प्रौढशिक्षणं दुष्करो भवति । साधारणशब्दानां प्रयोगस्तु सुलभ एव । नात्र व्याकरणे विशिष्टज्ञानमपेक्षितम् । तैश्च साधारणशब्दैः सर्वोऽपि व्यवहारः कल्पत एव । कन्नडभाषायां बहवः सन्ति संस्कृतशब्दाः सुप्रयुक्ताः । तेषां परिचयः समस्त्येव सर्वेषां जनानाम् । अव्ययानि क्रियापदानि च प्रायेण तेषाम-परिचितानि । तानि च दैनन्दिनिकव्यवहारोपयुक्तानि कानिचिदेव । तेषां परिचायनं नैव कष्टमावहति । क्रियापदानां स्थाने कृदन्तानां प्रयोगः सुकरः । इद सर्वं मनसिकृत्य यदि प्रयत्यते संस्कृतज्ञैः भाषेयं कष्टेति मतिरपास्ता भवति छात्राणाम् ।

सरलीकरणाय यतमानैर्न कदाचिद् व्याकरणशास्त्रमुपेक्षितव्यम् । शब्दानां लिङ्गनियमो वा धातूनामात्मनेपदपरस्मैपदव्यवस्था वा, गणव्यवस्था वा यद्युदस्यते, तर्हि भाषेयं संस्कृतैव न भवति, अपरेयमपभ्रंशभाषा भवेदिति मन्तव्यम्[१] ।

## संस्कृतप्रचारः

भारतीयेषु संस्कृताभ्यासकुतूहलमिदानीं विभिन्नकारणैः प्रच्छादितम्, अत एव बहुशो निष्क्रियश्च। तदिदमुद्बोधयितुमवश्यमस्माभिः प्रयत्नः कर्तव्यः। पाठशालास्थापनं केवलं नास्मिन्नभ्युपायः। विद्यमानासु पाठशालासु विरलाः सन्ति छात्राः। यदि संस्कृताभ्यासकौतुकमेव न स्याज्जनानाम्, तर्हि पाठशालाभिः किं क्रियेत? तस्मादस्माभिरभ्यासकुतूहलं तावदुद्बोधयितव्यं जनानाम्। इदञ्च संप्रधार्य बेङ्गळूरुनगरस्थेन हिन्दूसेवा-प्रतिष्ठानेन चाल्यमानानि संस्कृतसंभाषणशिबिराणि प्रशंसनीयानि प्रमुखानि चेति मे मतिः। एतानि शिबिराणि जनप्रियाणि भूत्वा दिने दिने प्रत्याशा-समुत्पादकान्यभवन्। विभिन्नजीविकावृत्तीन् जनान् इमानि शिबिराणि यशस्वितया समाकर्षन्ति। संस्कृतं सुलभमिति बुद्धिरुत्पादिता तेषाम्। एतादृशानि संभाषणशिबिराणि अखिलेऽपि कर्णाटके ग्रामेषु नगरेषु च यत्नेन योज्यानि, महाजनैः प्रोत्साहनीयानि च।

एवमेव जनप्रियं नाटकं तत्र तत्र प्रदर्शनीयम्। बेङ्गळूरु जयनगरोप-नगरे N. M. K. R. V. First Grade College for Women इत्यत्र प्रयोज्यमानो नाटकोत्सवोऽत्र आदर्शभूतः समेषाम्। प्राचीनानां नाटकानां प्रदर्शने दीर्घकालसापेक्षत्वात् नेपथ्यभूयिष्ठत्वाच्च तदपेक्षया सामाजिकानि ऐतिहासिकानि च अभिनेतुमर्हाणि भवन्ति। तादृशानि लघुनाटकानि चाधुनिकैः संस्कृतकविभिर्विरचितानि सन्तीति सन्तोषास्पदम्। भूयोऽपि कविभिरस्मिन् विषये प्रयत्नः करणीयः। समयेऽस्मिन्नस्माभिर्महता संभ्रमेण स्मरणीयमिदमस्ति, यत् श्रीमता जी. वी. अय्यर्महोदयेन 'आदिशङ्कराचार्य' नामकं चलनचित्रं संस्कृतभाषायामिदम्प्रथमतया निर्मितम्, तच्च सुवर्ण-कमलप्रशस्तिं जिगायेति। दिशि दिशि समुद्घोषितं संस्कृतस्य सौलभ्यम्।

संस्कृतप्रचारविषये श्री वासुदेवद्विवेदीमहोदयैः सुरभारतीसंदेशाख्ये ग्रन्थे लिखिता इमाः सूक्तयो मननीयाः। तत्र सुरभारती भारतीयान् सन्दिशति—

बहुव्रतानि कुर्वन्ति भवन्तः प्रतिवत्सरम् ।
इदानीमिदमप्येकं व्रतं स्वीक्रियतां नवम् ॥
व्याख्यानेनाथ लेखेन सभासंमेलनादिभिः ।
आयोजनेन गोष्ठीनां संगीताभिनयैस्तथा ॥
प्रदर्शिनीभिर्ग्रन्थानां कविसंमेलनेन च ।
पुराणवचनैश्चापि तथा प्रहसनादिभिः ॥
विद्यालयानां सर्वेषां छात्रैरध्यापकैस्तथा ।
आरम्भो मत्प्रचाराय स्वीये क्षेत्रे विधीयताम् ॥ इति (पु. सं. 19)

## नूतनशब्दनिर्माणम्

व्यवहारपथे यदि संस्कृतमानेतुं प्रयतामहे, तर्हि क्लेशानुभवोऽपि दुर्निवारः । सांप्रतं नूतनतयाविष्कृतानां गृहोपकरणानां यान्त्रिकवस्तूनां वाणिज्यादिषूपयुज्यमानानां भूयसां पदार्थानां वाचकाः शब्दा नोपलभ्यन्ते । इमं क्लेशं परिहर्तुं त्रेधास्माभिः परिहारः शक्यते कर्तुमिति मे प्रतिभाति—

१. कौटिल्यस्य अर्थशास्त्रे, शुक्रनीतिसारे, नाट्यशास्त्रे, वास्तुशिल्पग्रन्थे, वैद्यके, पाकशास्त्रे, धर्मशास्त्रे, वात्स्यायनकामसूत्रादिषु च प्रयुक्ता एव सन्ति विभिन्नाः शब्दाः, ये तावदिदानीं व्यवहारपथाल्लुप्ताः । ते च यत्नतः संग्राह्याः ।

२ अर्थविशेषे नूतना अपि शब्दाः शक्या निर्मातुम् । तथैव निर्मिताश्च सूरिभिः । यथा—राष्ट्रपतिः, राज्यपालः, लोकसभा, राज्यसभा, संसत्, विधानसभा, संविधानम्—इत्यादयः ।

तथा विद्युच्छक्तिः, आकाशवाणी, दूरदर्शनम्—इत्यादयश्च ।

३. संज्ञापदानि तावत् परिवृत्तिं न सहन्ते । तस्मात् नेहरू महाशयः, मद्रासनगरम्—इत्येव वक्तव्यं भवतीति स्पष्टम् । एवमेव

संस्कृतपदसामानाधिकरण्येन अन्यभाषाशब्दानां क्वचित् प्रयोगे का हानिः ? यथा—रैल्वेयानम्, बस्वाहनम् । चक्रपत्रम् इत्यादि ।

अस्मिन् विषये प्रयतितञ्च मनीषिभिः । इमानि पुस्तकानि अवलोकनार्हाणि ।

१. डॉ. रघुवीर-संपादितो महान् व्यवहारकोशः

२. महापण्डित राहुलसांकृत्यायन-संपादितः कोशः

३. हिन्दूसेवाप्रतिष्ठान-संपादितो व्यवहारकोशः ॥

## संशोधनम्

विश्वविद्यालयेषु Ph.D. पदवीप्राप्तये पदवीधराणां संशोधनस्यावकाशः कल्पितः । सांप्रदायिकीषु महापाठशालासु विदुषामवकाशोऽयं न कल्पितः । किमर्थोऽयं पक्षपातः इति न विद्मः । सशोधनप्रबन्धा अपि काव्यैरलङ्कारशास्त्रेण सीमिता भवन्ति प्रायेण । वेदवाङ्मये सांख्यादिदर्शनेषु विशेषतो जैनबौद्धसिद्धान्तेषु संशोधनं विरलप्राय संजातम् । वेदो नाम भगवन्निर्मितं काव्यमित्यभिप्रायेण 'देवस्य पश्य काव्यम्' इत्याह आथर्वणी श्रुतिः । आलङ्कारिककल्पिताः सर्वेऽप्यलङ्काराः ध्वनिप्रकाराश्च समुपलभ्यन्ते वेदेषु । किमत्र संशोधनस्यावकाशो नास्ति ? वेदेषु राष्ट्रियभावना, गणराज्यप्रकारः, वैदिकी संस्कृतिः, आधुनिकसंमत विज्ञानम् इत्यादयो बहवोऽशा यान्ति सशोधनस्य विषयताम् । अपि च पाणिनिराचार्यश्छन्दोऽधिकारे भूयसः शब्दान् व्युत्पादयति । तेषु कति शब्दा वेदेषूपलभ्यन्ते कति च नेति नाद्यापि निर्णीतम् ।

किञ्च सत्यपि समुद्रवद्विशाले गभीरे च संस्कृतसाहित्ये 'वैज्ञानिका विचारा दुर्लभाः, श्रद्धाजाड्यमेव प्रदर्शयन्ति संस्कृतग्रन्था' इति रूढमूलोऽयमपवादः । अस्यापवादस्य उन्मार्जनाय कियान् प्रयत्नः कृतः संशोधकैः ? श्रीदयानन्दसरस्वतीमहाभागेन एतदपवादोन्मूलनाय किञ्चियतितम् ,

निर्मूलने च पन्थाः प्रदर्शितः। अत्र श्रीवेङ्कटरमणय्यमहोदयेन रचितः 'सनातनविज्ञानसमुदय' ग्रन्थो विलोकनीयः। तत्र च भौतविज्ञानम् (Physics) रसायनविज्ञानम् (Chemistry) सस्यविज्ञानम् (Botany) भूविज्ञानम् (Geology), प्राणिविज्ञानम् (Zoology), शरीरविज्ञानञ्चेति (Physiology) विज्ञानस्य षट्प्रकारेषु प्राचीनभारतीयैरवलीढो विषयः समाहारेण निरूपितः।

सूर्यस्य उदयास्तमयौ न स्त इति स्पष्टमुल्लिखितं छान्दोग्योपनिषदि "नैवोदेता नास्तमेता एकल एव मध्ये तिष्ठति" इति (छां ३-११).

चन्द्रग्रहणस्य भूच्छाया निमित्तम्, सूर्यग्रहणस्य चन्द्रो निमित्तम्, न तु राहुः —इति स्पष्टमाह वराहमिहिरो बृहत्संहितायाम्—

'भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः'—इति,

'राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः'—इति च।

भूमिश्च गगनमध्ये शक्तिविशेषात्तिष्ठति, न तु दिग्गजैरुह्यते इति स एवाह—

'मेदीभूता खमध्यस्था' इति।

चन्द्रमसि दृश्यमानः किणः भूच्छायेति निश्चित्य वर्णयति कालिदासो रघुवंशे—

'छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिः' इति।
(रघु. १४-४०)

छान्दोग्ये त्रिवृत्करणप्रसङ्गे रोहितं, कृष्णं, शुक्लमिति त्रीण्येव रूपाणीत्युक्तम्। रूपं नाम वर्णः। त्रय एव वर्णा मूलभूताः। एतद्व्यतिरेकेण दृश्यमानो हरिद्वर्णादिः वर्णत्रयस्य संमिश्रणमिति तत्रत्यशाङ्करभाष्यादवसीयते। तदिदं वैज्ञानिकानां Tricolour Theory—तो नातिरिच्यत इति स्पष्टम्। अनया दिशा प्राचीनभारतीयानां विज्ञानावगतिः कियती बभूवेति संशोधनस्य विस्तृतोऽस्त्यवकाशः।

## आलङ्कारिकाणां कर्तव्यशेषः

अन्यच्च मे हृदयं सदा दुनोति, यत् पण्डितराज-जगन्नाथप्रणीतो रसगङ्गाधराख्योऽलङ्कारग्रन्थः दैवदुर्विपाकात् अर्धावशिष्टो न पूर्णः । अलङ्कार-शास्त्रमूर्धन्यभूतोऽयं ग्रन्थराजः उत्तरालङ्कारपर्यन्त एवोपलभ्यते । तदुदाहरण-भूतः श्लोकोऽप्यपूर्णः । सन्त्येवाद्यापि अलङ्कारशास्त्रनिष्णाता विद्वद्वराः । परन्तु न केनापि रसगङ्गाधरं पूरयितुं प्रयतितम् । भोजराजस्य चम्पू-रामायणम्, भवभूतेः महावीरचरितम्, बाणस्य कादम्बरी—चेति त्रीणि काव्यानि एवमेवार्धावशिष्टानि पूरितान्येव पूर्वसूरिभिरिति स्मरणीयम् ।

## सर्वकारस्य कर्तव्यविशेषः

कर्णाटकसर्वकारेण यथार्हं संस्कृताध्ययनस्य प्रोत्साहो दत्त इति पूर्वमावेदितम् । तदर्थं मया धन्यवादपूर्वकानि अभिनन्दनानि समर्प्यन्ते । अपरेयं भवत्यस्मदीया प्रार्थना । अस्मिन् राज्ये सर्वासु प्रौढशालासु संस्कृता-ध्ययनस्यावकाशो न कल्पितः । नूतनतया आरभ्यमाणासु प्रौढशालासु विषयोऽयं नैव परिशील्यत इति विषादनीयम् । अतः,

१. सर्वासु प्रौढशालासु संस्कृताध्ययनस्यावकाशो नियमेन कल्पनीयः ।

२. इदानीं बह्वीषु प्रौढशालासु, विद्यमानान्यपि संस्कृताध्यापक-स्थानानि नैव पूरितानि । चिरेण शून्यानि इमानि स्थानानि अध्यापकानां नियोजनेन शीघ्रं पूरणीयानि ।

३. सर्वासु P. U. C. महापाठशालास्वपि संस्कृताध्ययनस्यावकाशो नियमेन कल्पनीयः ।

४. संस्कृतवाङ्मयस्य पोषणार्थमुत्तेजनार्थञ्च संस्कृतप्रतिष्ठानमेकं निर्मातव्यम् ।

५. जम्मु, नवदेहली, गुरुवायूरु, तिरुपति प्रदेशेष्विव केन्द्रीय-विद्यापीठमेकं स्थापनीयम् ।

## संस्कृतज्ञानां कर्तव्यविशेषः

संस्कृतज्ञेषु विशेषतोऽध्यापकेषु भवतीयं मदीया प्रार्थना। सौहार्देन क्रियमाणेयं सहृदयतया प्रतिगृह्यताम्। यदधीतं शास्त्रं तत् पुनःपुनरवलोकनेन दृढीकरणीयम्। प्रवचनेन अध्ययनपरंपरा संरक्षणीया। आलस्यं विहाय संस्कृतप्रचाराय आत्मा नियोजनीयः।

अखिलकर्णाटकसंस्कृतपरिषदा संस्कृततरङ्गिणीति मासपत्रिका प्रकाश्यते सांप्रतम्। तदस्तु नाम परिषदो मुखपत्रम्। अन्या च परिषत्–पत्रिका विद्वज्जनप्रिया प्रकाशनीयेति मे मतिः। सा च भवतु त्रैमासिकी षाण्मासिकी वा, यत्र पाण्डित्यपूर्णाः संशोधनात्मकाश्च प्रबन्धाः प्रकाशं भजेरन्।

अयि विद्वज्जना मान्याः सभासदः,

एतावता यन्मे मनसि विद्यमानं तदुद्घाटितं समाहारेण। नाहं निराशः संस्कृतस्यायतौ। सन्त्येव संस्कृताभिमानिनो युवानः, विद्वांसो विविदिषवश्च कार्यकर्तारः संस्कृताभिवृद्धये बद्धकङ्कणाः। तेषु किल भारोऽयमारोपितः। सनातनी संस्कृतसरस्वती चिरं विराजताम्।

गुरुशङ्करफणभृद्वरपरिमार्जितपादे
कविशेखरनिवहार्पितनवमौक्तिकहारे।
वसुधार्चितबुधनिर्मितमणिचित्रकिरीटे
जय भारति करुणेक्षितजगतीतलभाषे॥

॥ नमः सर्वेभ्यः॥

ता. ८-१०-१९८४

एन्. रङ्गनाथशर्मा

प्रभा मुद्रणालयः, बसवनगुडि, बेंगलूर्–४